तस्य स्वस्य बोधाय आवणमाह नारदः ।
'असमर्थस्य पत्रस्थमभियुक्तं यथार्हतः ।
संश्राव्य मूर्द्धि तस्यैव न्यस्य देयो यथाक्रमम् ॥'
देयो दिव्यविशेषः प्राड्विवाकेनेति शेषः ॥ * ॥
ततः शिरोऽवस्थितपत्रकं शोध्यं नरं घटे पुनरारोपयेत् । पुनरारोपयेत्तस्मिन् शिरोऽवस्थितपत्रकमिति स्मरणात् । तुलारोपितस्य नरं विनाड़ीपञ्चककालं शतत्रयगुर्व्वक्षरोच्चारणयोग्यम् ।
'मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वामी: ।
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत् ।
चुतचामः प्राटंस्येतस्येतो राहुः क्रूरः प्रासात्तस्माद्धान्ते हर्म्यस्यान्ते प्रत्येकान्ते कर्त्तव्या ॥'
इति श्लोकस्य पञ्चधा पाठयोग्यकालं पञ्चपलात्मकं यावत् तावत् स्थापयेत् ॥ यथा, स्मृतिः ।
'ज्योतिर्विद्‌ब्राह्मणः श्रेष्ठः कुर्य्यात् कालपरीक्षणम् ।
विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः ॥'
तत्कालश्च ज्योतिषि ।
'दशगुर्व्वक्षरः प्राणः षट् प्राणाः स्याद्विनाड़िका ।
तासां षष्ट्या घटी ज्ञेयाहोरात्रं घटिकास्तथा ॥'
तथा षष्ट्या ॥ * ॥ पितामहः ।
'साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः ।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु ॥
शंसन्ति साक्षिणः सर्व्वे शुद्ध्यशुद्धी नृपे तथा ।
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः ॥
समो वा हीयमानो वा न विशुद्धो भवेन्नरः ।
अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते ॥'
अल्पत्वं व्यभिचारे व्यालिङ्गनादिना । चौर्य्ये तद्देशगमनादिना ॥ * ॥ तत्र पुनस्तोलनमाह बृहस्पतिः ।
'घटेऽभियुक्तस्तुलितो हीनश्छेदानिमाप्नुयात् ।
ततसमस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेत् ॥'
शोध्यः स्वल्पदोषाङ्गीकारेऽपि प्रधानदोषनिर्णयार्थं तत्रैव पुनस्तोलनीयः । अङ्गवैगुण्यसम्भावनायान्तु प्रयोगान्तरमिति । यद्वा चानुपलभ्यमानदृष्टकारणक एव कचादीनां छेदनादिकदाप्यशुद्धिः ।
'कचच्छेदे तुलाभङ्गे घटककर्कटयोस्तथा ।
रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत् ॥'
इति बृहस्पतिवचनात् ॥
कचं शिक्यतलम् । घटककर्कटौ तुलान्तयोः शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशृङ्गनिभौ । अक्षः पादः । स्तम्भयोरुपरिनिविष्टस्तुलाधारपट्ट इति मिताक्षरा ॥ दार्ढ्यप्रयोजकः कीलकः । इति हलायुधः ॥ मध्यकटकमिति पारिजातः ॥ यदा तु दृश्यमानकारणक एवैषां भङ्गस्तदा पुनरारोपयेत् । शिक्यादिच्छेदभङ्गेषु पुनरारोपयेन्नरमिति स्मृतेः । तत्र ।
'ऋत्विक्पुरोहिताचार्य्यान्दक्षिणाभिस्तु तोषयेत् ।
एवं कारयिता राजा भुक्ता भोगान् मनोरमान् ।
महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते ॥' * ॥

तदयं सङ्क्षेपः । प्राड्विवाको लोकपालादिनमस्कारपूर्व्वकं यथोक्तलक्षणां तुलां कुर्य्यात् । ततः षड्हस्तौ सुदृढ़ौ स्तम्भौ कृत्वा हस्तद्वयव्यवधानेन दक्षिणोत्तरयोर्द्दिशोर्हस्तद्वयनिखननं कृत्वा पट्टधारकीलकाग्रस्तम्भयोरुपरि मध्ये पार्श्वद्वये च विहितच्छिद्रं मध्यच्छिद्रनिवेशितलौहाङ्कुशपट्टकं निधाय उपरि कीलकस्य ततपट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यवलयस्थलौहाङ्कुशं संयुञ्ज्यात् । एवञ्च मध्ये स्तम्भयोरन्तरा तिर्य्यक् तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यद्वयरज्जुबन्धनं कुर्य्यात् । तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरि सूत्रसम्बद्धौ मृण्मयावधोमुखौ घटमस्तकचुम्बितौ अवलम्बौ कार्य्यौ । यथावलम्बविश्लेषाभ्यां तुलायामवनतिरुन्नतिश्च ज्ञेया तथा जलदारापि ।"
इति दिव्यतत्त्वम् ॥ * ॥ अस्य प्रयोगस्तुलाशब्दे द्रष्टव्यः ॥

घटी, स्त्री, (धन + अच् । निपातनात् नस्य टः । गौरादित्वात् ङीष् ।) चीरवस्त्रम् । इति मेदिनी । टे, १६ ॥ कौपीनम् । इति त्रिकाण्डशेषः ॥

घटीदानं, क्ली, (घट्या चीरवस्त्रस्य दानम् ।) गर्भाधानानन्तरस्त्रीसम्प्रदानकचीरवस्त्रदानम् । यथा, ज्योतिःसारसंग्रहे ।
"मूलश्रवणहस्तेषु पुष्यादितिसुतरासु च ।
स्मरपौष्णे घटी देया सौम्यवारे शुभे तिथौ ॥"

धण, ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) धणति स्वदङ्गः । इति दुर्गादासः ॥

धत्तूरः, पुं, (धयति पिबतीव प्रकृतिम् । धे + बाहुलकात् उरच् । पृषोदरादित्वात् साधुः ।) धुस्तूरः । इति हेमचन्द्रः । ४ । २१७ ॥ (यथा, काशीखण्डे । २६ । ६४ ।
"धर्म्माधर्म्मगुणच्छेत्री धत्तूरकुसुमप्रिया ॥")

धन, रवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) धनति स्वदङ्गः । इति दुर्गादासः ॥

धन, लि र धान्ये । इति कविकल्पद्रुमः ॥ (ह्लां-परं-अकं-सेट् ।) धान्यमिह धान्यक्रिया । र, वैदिकः । लि, दधन्ति भूमिर्धान्यमुत्पादयति इत्यर्थः । इति दुर्गादासः ॥

धनं, क्ली, (धनति रौतीति । धन रवे + पचाद्यच् ।) स्वेच्छापात्रम् । इति शब्दरत्नावली ॥ गोधनम् । इति मेदिनी । ने, १२ ॥ (यथा, हरिवंशे । ७३ । ३३ ।
"अनुजग्मुश्च गोपालाः कालयन्तो धनानि च ॥")
जीवनोपायः । (दधन्ति धान्यादिकमुत्पादयतीति । धन + अच् । यद्वा, दधाति सुखमिति । धा + "कृपृवृजिमन्दिनिधाञ्‌ः क्युः ।" उणां २ । ८१ । इत्यत्र "बाहुलकात् केवलादपि क्युः ।" इत्युज्ज्वलदत्तोक्तेः क्युः ।) द्रविणम् । (यथा, उद्भटे ।
"धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो नास्ति बन्धुर्हि लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥")

तत्पर्य्यायः । द्रव्यम् २ वित्तम् ३ स्वापतेयम् ४ रिक्थम् ५ ऋक्थम् ६ वसु ७ हिरण्यम् ८ द्रविणम् ९ द्युम्नम् १० अर्थः ११ राः १२ विभवः १३ । इत्यमरः । २ । ९ । ९० ॥ काञ्चनम् १४ लक्ष्मीः १५ भोग्यम् १६ सम्पत् १७ वृद्धिः १८ श्रीः १९ व्यवहार्य्यम् २० । इति राजनिर्घण्टः ॥ रैः २१ भोगः २२ । इति जटाधरः ॥ स्वम् २३ । इति शब्दरत्नावली ॥ तस्य वैदिकपर्य्यायाः । मघम् १ रेक्णः २ रिक्थम् ३ वेदः ४ वरिवः ५ श्वात्रम् ६ रत्नम् ७ रयिः ८ क्षत्रम् ९ भगः १० मीढुम् ११ गयः १२ द्युम्नम् १३ इन्द्रियम् १४ वसु १५ रायः १६ राधः १७ भोजनम् १८ तना १९ नृम्णम् २० बन्धुः २१ मेधाः २२ यशः २३ ब्रह्म २४ द्रविणम् २५ श्रवः २६ वृत्रम् २७ वृतम् २८ । इत्यष्टाविंशतिरेव धननामानि । इति वेदनिघण्टौ २ अध्यायः ॥ * ॥
तत्त्रिविधं यथा,—
"धनन्तु त्रिविधं ज्ञेयं शुक्लं शवलमेव च ।
कृष्णञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक् ॥
क्रमायत्तं प्रीतिदायं प्राप्तञ्च सह भार्य्यया ।
अविशेषेण सर्व्वेषां वर्णानां त्रिविधं धनम् ॥
वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम् ।
याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः ॥
त्रिविधं क्षत्रियस्यापि प्राहुर्व्वैशेषिकं धनम् ।
युद्धार्थलब्धं करजं दण्डवध्यापहारतः ॥
वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात् ॥
कुसीदकृषिवाणिज्यं प्रकुर्व्वीत स्वयं कृतम् ।
आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः ॥"
इति गारुडे २१६ कुत्रचित् २१० अध्यायः ॥ * ॥
धनभागिनो दायशब्दे द्रष्टव्याः । धनाभागिनो यथा,—
"कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि ।
उन्मत्तानां तथान्धानां धनभागो न विद्यते ॥
शय्यासनस्थानमाच्छाद्या चान्नं भुजिक्रिया ।
एतावद्दीयते दैव नार्थभागहरा हि ते ॥"
इति वामनपुराणे ७५ अध्यायः ॥ * ॥
अधना यथा,—
"त्रय एवाधना राजन् ! भार्य्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥"
इति मात्स्ये ३१ अध्यायः ॥ * ॥
धनस्य प्राणतुल्यत्वमुक्तं यथा,—
"यदेतद्‌द्रविणं नाम प्राणा एते बहिश्चराः ।
स तस्य हरते प्राणान् यो यस्य हरते धनम् ॥'
इति कौर्म्मे २६ अध्यायः ॥ * ॥
"अपराधमक्लेशं प्रयत्नेनार्जितं धनम् ।
स्वल्पं वा बहुलं वापि देयमित्यभिधीयते ॥"
अपराधं परपीड़ारहितम् । अक्लेशं पात्रक्लेशाजनकम् ॥ * ॥ तामसधनं यथा,—
"पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यत्तु तत् कृष्णं समुदाहृतम् ॥"
पार्श्विकः पात्रतया योऽर्जयति । आर्त्तेरा पर-